শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ চতুস্ত্রিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ চতুস্ত্রিংশঃ সর্গঃ ॥

**গাধেরুৎপত্তিঃ কৌশিক্যাঃ প্রশংসা ৱিশ্ৱামিত্রেণ কথাং সমাপ্য নিশীথস্য ৱর্ণনং সর্ৱেভ্যঃ শযিতুমনুজ্ঞাং প্রদায স্ৱযমপি তস্য শযনম্**

কৃতোদ্ৱাহে গতে তস্মিন্ ব্রহ্মদত্তে চ রাঘৱ।
অপুত্রঃ পুত্রলাভায পৌত্রীমিষ্টিমকল্পযৎ॥ **1.34.1** ॥

ইষ্ট্যাং তু ৱর্তমানাযাং কুশনাভং মহীপতিম্।
উৱাচ পরমোদারঃ কুশো ব্রহ্মসুতস্তদা॥ **1.34.2** ॥

পুত্রস্তে সদৃশঃ পুত্র ভৱিষ্যতি সুধার্মিকঃ।
গাধিং প্রাপ্স্যসি তেন ৎৱং কীর্তিং লোকে চ শাশ্ৱতীম্॥ **1.34.3** ॥

এৱমুক্ত্ৱা কুশো রাম কুশনাভং মহীপতিম্।
জগামাকাশমাৱিশ্য ব্রহ্মলোকং সনাতনম্॥ **1.34.4** ॥

কস্যচিৎ ৎৱথ কালস্য কুশনাভস্য ধীমতঃ।
জজ্ঞে পরমধর্মিষ্ঠো গাধিরিত্যেৱ নামতঃ॥ **1.34.5** ॥

স পিতা মম কাকুৎস্থ গাধিঃ পরমধার্মিকঃ।
কুশৱংশপ্রসূতোঽস্মি কৌশিকো রঘুনন্দন॥ **1.34.6** ॥

পূর্ৱজা ভগিনী চাপি মম রাঘৱ সুব্রতা।
নাম্না সত্যৱতী নাম ঋচীকে প্রতিপাদিতা॥ **1.34.7** ॥

সশরীরা গতা স্বর্গং ভর্তারমনুৱর্তিনী।
কৌশিকী পরমোদারা প্রৱৃত্তা চ মহানদী॥ **1.34.8** ॥

দিৱ্যা পুণ্যোদকা রম্যা হিমৱন্তমুপাশ্রিতা।
লোকস্য হিতকার্যার্থং প্রৱৃত্তা ভগিনী মম॥ **1.34.9** ॥

ততোঽহং হিমৱৎপার্শ্ৱে ৱসামি নিযতঃ সুখম্।
ভগিন্যাং স্নেহসংযুক্তঃ কৌশিক্যাং রঘুনন্দন॥ **1.34.10** ॥

সা তু সত্যৱতী পুণ্যা সত্যে ধর্মে প্রতিষ্ঠিতা।
পতিৱ্রতা মহাভাগা কৌশিকী সরিতাং ৱরা॥ **1.34.11** ॥

অহং হি নিযমাদ্ রাম হিৎৱা তাং সমুপাগতঃ।
সিদ্ধাশ্রমমনুপ্রাপ্তঃ সিদ্ধোঽস্মি তৱ তেজসা॥ **1.34.12** ॥

এষা রাম মমোৎপত্তিঃ স্বস্য ৱংশস্য কীর্তিতা।
দেশস্য হি মহাবাহো যন্মাং ৎৱং পরিপৃচ্ছসি॥ **1.34.13** ॥

গতোঽর্ধরাত্রঃ কাকুৎস্থ কথাঃ কথযতো মম।
নিদ্রামভ্যেহি ভদ্রং তে মা ভূদ্ ৱিঘ্নোঽধ্ৱনীহ নঃ॥ **1.34.14** ॥

নিষ্পন্দাস্তরৱঃ সর্ৱে নিলীনা মৃগপক্ষিণঃ।
নৈশেন তমসা ৱ্যাপ্তা দিশশ্চ রঘুনন্দন॥ **1.34.15** ॥

শনৈর্ৱিসৃজ্যতে সন্ধ্যা নভো নেত্রৈরিৱাৱৃতম্।
নক্ষত্রতারাগহনং জ্যোতির্ভিরৱভাসতে॥ **1.34.16** ॥

উত্তিষ্ঠতে চ শীতাংশুঃ শশী লোকতমোনুদঃ।
হ্লাদযন্ প্রাণিনাং লোকে মনাংসি প্রভযা স্বযা॥ **1.34.17** ॥

নৈশানি সর্ৱভূতানি প্রচরন্তি ততস্ততঃ।
যক্ষরাক্ষসসঙ্ঘাশ্চ রৌদ্রাশ্চ পিশিতাশনাঃ॥ **1.34.18** ॥

এৱমুক্ত্বা মহাতেজা ৱিররাম মহামুনিঃ।
সাধুসাধ্ৱিতি তে সর্ৱে মুনযো হ্যভ্যপূজযন্॥ **1.34.19** ॥

কুশিকানামযং ৱংশো মহান্ ধর্মপরঃ সদা।
ব্রহ্মোপমা মহাত্মানঃ কুশৱংশ্যা নরোত্তমাঃ॥ **1.34.20** ॥

ৱিশেষেণ ভৱানেৱ ৱিশ্ৱামিত্র মহাযশঃ।
কৌশিকী সরিতাং শ্রেষ্ঠা কুলোদ্যোতকরী তৱ॥ **1.34.21** ॥

মুদিতৈর্মুনিশার্দূলৈঃ প্রশস্তঃ কুশিকাত্মজঃ।
নিদ্রামুপাগমচ্ছ্রীমানস্তঙ্গত ইৱাংশুমান্॥ **1.34.22** ॥

রামোঽপি সহসৌমিত্রিঃ কিঞ্চিদাগতৱিস্মযঃ।
প্রশস্য মুনিশার্দূলং নিদ্রাং সমুপসেৱতে॥ **1.34.23** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে চতুস্ত্রিংশঃ সর্গঃ ॥